## परिखाया ढञ्। (१७/१६७९)

परिखाशब्दात् ढञ् प्रत्ययो भवति 'तदस्य तदस्मिन् स्यात्' (५.१.१६/१६७८) इत्येतस्मि[1]न्नर्थे। छस्यापवादः। पारिखेयी भूमिः। छयतोः पूर्णोऽवधिः। इतः परमन्यः प्रत्ययो विधीयते॥

## प्राग्वतेष्ठञ्। (१८/१६८०)

'तेन तुल्यं क्रिया चेद्वतिः' (५.१.११५/१७७८) इति वक्ष्यति। प्रागेतस्माद् वतिसंशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामः ठञ् प्रत्यय[2]स्तेष्वधिकृतो वेदितव्यः। वक्ष्यति – 'पारायणतुरायणचान्द्रायणं वर्तयति' (५.१ ७२/१७३६)। [3]पारायणिकः। तौरायणिकः। चान्द्रायणिकः॥

## आर्हादगोपुच्छसङ्ख्यापरिमाणाट्ठक्। (१९/१६८१)

[4]'तदर्हति' (५.१.६३/१७२८) इति वक्ष्यति। आ एतस्मादर्हसंशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामः ठक् प्रत्ययस्तेष्वधिकृतो वेदितव्यः, गोपुच्छादीन् वर्जयित्वा। [5]अभिविधावयमाकारः, तेनार्हत्यर्थोऽपि ठक् [6]भवत्येव। ठञधिकारमध्ये तदपवादः ठग्विधीयते। वक्ष्यति – 'तेन क्रीतम्' (५.१.३७/१७०२)। [7]नैष्किकम्। पाणिकम्। अगोपुच्छसङ्ख्यापरिमाणात् इति किम्? गोपुच्छेन क्रीतं [8]गौपुच्छिकम्। [9]सङ्ख्या – षाष्टिकम्[10]। परिमाण – [11]प्रास्थिकम्। [12]कौडविकम्। [13]ठञ् प्रत्युदाह्रियते। सङ्ख्यापरिमाणयोः को विशेषः? भेदगणनं सङ्ख्या एकत्वादिः। गुरुत्वमानमुन्मानं [14]पलादि। आयाममानं प्रमाणं वितस्त्यादि। आरोहपरिणाहमानं परिमाणं प्रस्थादि।

ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः।
आयामस्तु प्रमाणं स्यात् सङ्ख्या बाह्या तु सर्वतः (म. भा. २.३४३)॥

## असमासे निष्कादिभ्यः। (२०/१६८२)

आर्हात् (५.१.१९/१६८१) इत्येव। निष्कादिभ्यः शब्देभ्योऽसमासे ठक् [15]प्रत्ययो भवति आर्हीयेष्वर्थेषु। ठञोऽपवादः। नैष्किकम्। पाणिकम्। पादिकम्। माषिकम्।

असमासे इति [16]किम्? [17]परमनैष्किकम्। उत्तमनैष्किकम्। [18]ठञेव भवति, परिमाणान्तस्य (७.३.१७/१६८३) इत्युत्तरपदवृद्धिः। अथ किमर्थमसमासे इत्युच्यते यावता ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते (व्या. प. ८९)? निष्कादिष्वसमासग्रहणं ज्ञापकं पूर्वत्र तदन्ताप्रतिषेधस्य। 'उगवादिभ्यो यत्'

---

1. विषये फ. 2. तेष्वर्थेषु क. 3. कृत्स्नवेदजपं निर्वर्तयन् पारायणिकः। तुरायणस्य यज्ञं निर्वर्तयन् तौरायणिकः ग. 4. एतद्वाक्यं नास्ति ह. 5. अभिविधौ चायमाङ् क. 6. एव नास्ति क. फ. 7. निष्केण क्रीतः नैष्किकः क. ह, पाणिकः फ, पाथिकं क. 8. गौपुच्छिकः फ. 9. संङ्ख्या नास्ति फ, संख्यायाः ङ. 10. आशीतिकं इत्यधिकम् क, साप्ततिकम् इत्यधिकम् ह. 11. प्रास्थिकः क. 12. कौटुम्बिकम् ह. 13. सर्वत्र इत्यधिकम् क. 14. तुलादिः फ. ह. 15. प्रत्ययः नास्ति फ. 16. किमर्थमुच्यते क. 17. परमनैष्किकः फ, उत्तमनैष्किकम् नास्ति फ, उत्तरनैष्किकम् ग. 18. तेनैव इत्यधिकम् ह.